॥ श्रीसीतारामचन्द्राभ्यां नमः ॥
॥ श्रीमते रामानन्दाचार्याय नमः ॥
॥ श्रीमद्गोस्वामितुलसीदासाय नमः ॥

नारायणकृत

॥ सीतास्तुतिः ॥

This text has been prepared by
Vishal Pandey (B.Tech IIT Kanpur)
with the blessings of
Citrakūṭa Tulāsīpīṭhādhiśvara
Jagadguru Rāmānandācārya
Śrī Svāmī Rāmabhadrācārya

श्रीनारायण उवाच

नतोऽस्मि नित्यं जगदीश्वरेश्वरि त्वदङ्घ्रिसंतानकपुष्पयुग्मकम् ।
चिरं यदास्वाद्य रसोऽप्यहं सदा भवामि नित्योदयि दिव्यचेष्टितः ॥ १ ॥

असौ विधिः सर्गविसर्गयोः क्षमस्तथाहमेतत्परिपालनप्रभुः ।
हरस्तथा संहरणेऽस्य कोविदस्तदेतदाराधनमीशि तावकम् ॥ २ ॥

अथ तत्रैत्य भगवान् नारायण उदारधीः ।
निजांशिनीं श्रीसहजां तुष्टाव परमेश्वरीम् ॥ ३ ॥

विभासि नित्यैव च चरित्रधोरणीविचिन्वतां वेदपथेषु वास्तवीम् ।
वितन्वती ब्रह्मशिवादिचिन्तनप्रमोददां नित्यमुदारमानसे ॥ ४ ॥

अचिन्त्यरूपापि तथा गुणातिगाप्यवाच्यरूपापि गिरामधीश्वरैः ।
विचिन्तनीयासि गुणैर्मनोरमाप्यहो स्वभक्तैर्नितरां प्रगीयसे ॥ ५ ॥

संख्यातुमर्हाणि न ते जगन्नुते नामानिरूपाणि च विश्वपाविनि ।
यज्ज्ञानमात्रेण भृशं जनोऽश्नुते त्रिवर्गलभ्याधिकमर्थमुज्ज्वलम् ॥ ६ ॥

आदिस्त्वमेवासि च मध्यमस्थ वै त्वमेव चान्तस्त्रिदशाधिपाधिये ।
त्वत्तोऽखिलं विश्वमिदं त्वयि स्थितं त्वय्यैव च ब्रह्मणि सम्प्रलीयते ॥ ७ ॥

त्वमेव लोकेश्वरिभासि सर्वगा त्वमेव चाहं धिषणैकगोचरः ।
त्वमेव वित्तिस्त्वमहंपदार्थयोः सशब्दशब्दार्थपरिच्छिदाकृतिः ॥ ८ ॥

यान्येव नामानि खिलस्य वस्तुनस्तान्येव ते सर्वपदार्थरूपिणि ।
न हि त्वदन्यं कलयन्ति कोविदाः शब्देन चार्थेन च भाविताकृतिः ॥ ९ ॥

उपासनं ते जगदीशि कर्मभिर्ज्ञानेन भक्त्या च विशुद्धरूपया ।
यस्त्वां भवे द्वेष्टि समस्तरूपिणी सर्वं परादादमुतो हि तत्त्वतः ॥ १० ॥

अतस्त्वमेवाखिलवत्मसु स्थिता करोषि कल्याणकदम्बकं भवे ।
तेजं सु यद्वत्सकलेषु संस्थितो विभाति भासा रविरेव केवलः ॥ ११ ॥

माया प्रधानं प्रकृतिस्तथैव चाव्यक्तकल्पेत्यादिपदार्थरूपिणीम् ।
ब्रुवन्ति ये त्वां जगदीशि तेऽबुधा न तत्त्वतस्त्वां किमपाह जानते ॥ १२ ॥

ब्रह्मेति ये त्वां प्रवदन्ति निर्गुणं तेऽप्यञ्जसा नैव विदन्ति वस्तुतः ।
यतः प्रतिष्ठासि परस्य तस्य चिन्मात्रस्यसच्चित्सुखधर्मधर्मिणि ॥ १३ ॥

सर्वं खलुत्वय्युपपन्नमञ्जसा गुणांश्च नैर्गुण्यमपि प्रभावितम् ।
यथा घने सैन्धवखण्ड उज्ज्वले बहिस्तथाभ्यन्तरमेकवस्तुता ॥ १४ ॥

त्वमेव धर्मस्य प्रसरस्य धर्मिणी न भेदतोऽस्ति त्वयि धर्मधर्मिता ।
अथापि चेदस्तु यतोऽखिलात्मके भिदा पदार्थोऽपि न भिद्यते परम् ॥ १५ ॥

त्वयीदृशेवस्तुनि सच्चिदात्मके विरुद्धभावप्रसरोऽपि नेष्यते ।
अस्त्युष्णता तेजसि वार्यनुष्णता समुच्चितं त्वय्युभयं निरीक्षते ॥ १६ ॥

ध्वनिश्च वर्णश्च पदं च सुप्तिङौ वाक्यं महावाक्यमथागमोऽखिलः ।
त्वमेव हि व्याससमासरूपतः प्रपञ्चमे वाक्प्रसरेण विश्वतः ॥ १७ ॥

अनादिरेष द्रुम उद्ययौ यतो न मृग्यते मूलममुष्य तत्क्वचित्।
त्वां तु प्रविज्ञाय विनिश्चितं भवेद्यत्रानिशं सन्दिहते बुधा अपि॥ १८॥

साक्षात्कदाचित्कुरुषेऽखिलं स्वयं त्वं पूरुषद्वारतया कदाचन।
निजैच्छयैवेशि कदाचिदन्यथा कदाचिदात्मैव समस्तमाबभौ॥ १९॥

वितत्य सर्वं च कदाचिदात्मना करोषि मातस्त्वमनुप्रवेशनम्।
इत्थं प्रपञ्चे रमसे स्वनिर्मिते यतः समस्तो रमणार्थमेव॥ २०॥

तवैव चेष्टात्मक एष एधते कालः कलाकोटिकदम्बकप्रभुः।
ये वस्तुमात्रोपरि लेढि त तद्गुणान् स लिह्यते चित्कलया किल त्वया॥ २१॥

अथ स्वरूपेण चरित्रधोरणीमधिप्रमोदाटवि यद्वितन्वती।
अत्युद्भुतैः क्रीडसि विश्वमङ्गलैर्गुणैर्महोदारतरैः परात्परैः॥ २२॥

विजृम्भतेसा करुणात्मता तव स्वभक्तवर्गेषु तदेकजीविषु।
विचिन्तयेयुः खलु ते किमन्यथाभवापवर्गेच्छुतया विरक्ताः॥ २३॥

(युग्मं) कालः स्पृशत्येव न ते विचेष्टितं सच्चित्सुखैकात्मतया परात्परम्।
अतोऽस्य मूर्द्ध्नि स्वपदं निधाय ते क्रीडन्ति सर्वस्वभुजो भवज्जनाः॥ २४॥

नमामि ते रूपमदभ्रविभ्रमं कर्णावतंसीकृतरत्नमञ्जरि।
महाच्छनासामाणीशोभिताननं स्फुरत्कपोलालकवल्लिमञ्जुलम्॥ २५॥

परार्द्धरत्युत्कटरूपसम्पदा विरोचमानाङ्घ्रिनखप्रभाभरम्।
लीलालसालोलगतिक्रमोद्भवत्रपाविनम्रीकृतराजहंसकम्॥ २६॥

सकेलिकूजन्मणिनूपुरध्वनिच्छात्री कृतोद्यत्कलहंसनिक्वणम्
मञ्जीरिकाधोऽञ्चितहेमकिङ्किणीगणोपधिस्वैरव गुञ्जषद्वदम् ॥ २७ ॥

मन्दानिलान्दोलिदुकूलकान्तरप्रसृत्वरज्योति रुदग्रपीडिकम् ।
ताम्बूलिकामत्रमनोजघुण्टिकानिरीक्षणोन्मादितमन्मथान्तरम् ॥ २८ ॥

करीन्द्रशुण्डाकदलीकलामुषोः सुजङ्घयोः कान्तिभरेण चिन्तयत् ।
वासोत्तरीयं तनुसूत्रनिर्मितं हेमाम्बुनिर्णिक्तमिवाच्छमद्भुतम् ॥ २९ ॥

नितम्बबिम्बद्वितयद्युतिच्छटाविनिर्जितार्केन्दुसुपूर्णमण्डलम् ।
अधस्तरोयाम्बरपट्टदोरिकाविलम्बिगुच्छाकृति मौक्तिकव्रजम् ॥ ३० ॥

गम्भीरनाभीह्रदमाधुरीरसप्रमग्नरामेन्दुरसीन्द्रमानसम्
तदुद्भवानेकबलीतरंगिणीत रंगनीरोत्तरलीकृतान्तरम् ॥ ३१ ॥

रोमावलीतद्गतशैवलावलीविलीनहृच्छ्रीरसिकेन्द्रपक्षिराट्
तनूदरस्थाननितान्तसंशयज्ञानस्थदोलादुलिताखिलाशयः ॥ ३२ ॥

उत्तुङ्गवक्षोरुहभारभावितश्रीविग्रहात्यन्तविनम्रतारुचि
अनेकमुक्तामणिहारभासुरग्रीवाविलग्नत्रिसरातिसौभगम् ॥ ३३ ॥

पञ्चाशुगोद्भावितलोकनिर्जयध्वानोद्भववव्यञ्जनकण्ठकम्बुमत ।
अनेककोटिस्फुटचन्द्रमण्डलश्रीचौरवक्त्रच्छविसारभासुरम् ॥ ३४ ॥

मुखेन्दुपूर्णामयसर्ववासरप्रमोदिदृक्चारुचकोररोचितम् ।
धमिल्लमल्लीसुमनोऽभिगुंफितमधुव्रतासादितमाधुरीरसम् ॥ ३५ ॥

तदेतसीमन्तितदिव्यमौक्तिकप्रकृष्टताराविलकान्तकीर्तिमत् ।
अमन्दवेणीमणिचन्द्रचन्द्रिकाप्रकाशसन्तोषितनेत्रकैरवम् ॥ ३६ ॥

दन्तावलिद्योतविमिश्रनिर्मलश्रीमन्दहासामलमञ्जुकान्तिमत् ।
दोर्वल्लिवल्गुस्फुरितांसयुग्मकप्रकाण्डनित्योद्धुरताविराजितम् ॥ ३७ ॥

नखौघमारभ्यशिखान्तमुच्चकैरेकैकमेभिर्नयनैरुपासितम् ।
कटाक्षसंजीवितसर्वमारितस्मरप्रवीरप्रवरप्रमोददम् ॥ ३८ ॥

यद्यप्यदोङ्गं तव सर्वमद्भुतं तथापि मन्मानसबन्धनाय ते ।
सदास्तु पादाम्बुजयुग्ममुल्लसन्नखौघकिंजल्कसमूहञ्जितम् ॥ ३९ ॥

ध्यानाय गानाय च भक्तचेतसां प्रमोददानाय च नित्यमेधताम् ।
तवेदृशं सौभगमङ्गमाधुरीविमिश्रमत्यर्थमनोहर प्रभोः ॥ ४० ॥

प्रमोदनामाङ्कितमद्भुतं वनं लीलालयं मे हृदये विराजताम् ।
यदंशमात्रैव विभाति माधुरी वैकुण्ठवृन्दावनगह्वरादिषु ॥ ४१ ॥

लीलाधामविशिष्टमद्भूततमं श्री सम्पदां मन्दिर
सच्चिद्रूपमनन्तमक्षरमयं यद्व्यापकं विश्वतः ।
तत्ते धाम विराजतां मम हृदि श्रीरामरामेरमे
प्रेमानन्दमयं मनश्च वचनं सुश्रुन्निवृत्तं यतः ॥ ४२ ॥

लीलास्तास्तव राससंनिधिमिता भक्ताखिलास्वादिता
व्यक्ताव्यक्ततया प्रमोदविपिने सजायमानाः पराः ।
भक्तानां हृदयैकचिन्तनरसप्रेमप्रवृद्धप्रदा
भूयासुर्ममजीवनाय सहजानन्दे गुणग्रामणीः ॥ ४३ ॥

परं ब्रह्म रामचन्द्रः सच्चिदानन्दमात्रकः ।
यदीदृशं न प्रभवेद्भक्तानां जीवनं कथम् ॥ ४४ ॥

प्रमोदपात्रीकृतभक्तमानसं ब्रह्मादिदेवैरपि सुष्टु भावितम् ।
लीलारसानन्दत्रयं विराजितं समेधतां मद्धृदयैकजीवनम् ॥ ४५ ॥

नमः श्रीनन्दनाख्याय गोपराजाय धीमते ।
नमस्तथा श्रीराजिन्ये याभ्यां त्वं नित्यलालिता ॥ ४६ ॥

नमस्तदावेशयुङ्भ्यां वात्सल्यरसवुष्टाभ्याम् ।
भाग्यवदभ्यां त्रिभुवनसौख्यकाभ्यां निरन्तरम् ॥ ४७ ॥

दशरथकौसल्याभ्यां सुखितश्रीमाङ्गल्यकाभ्यां च ।
त्रिभुवन सौराज्यपदप्रभाविताभ्यां नमो नित्यम् ॥ ४८ ॥

नमस्ते नित्यपूर्णायै लीलायै मधुरश्रिये ।
यदावेशवशादेतन्मिथुनं नित्यं भासते ॥ ४९ ॥

इति स्तुत्वास्फुरल्लीलारसावेशितया मुहुः ।
रोमाञ्चिततनुविष्णुर्दण्डवत्प्रापतद्भुवि ॥ ५० ॥

मुहुर्मुहुः स्तुतिं कृत्वा नतिं कृत्वा मुहुर्मुहुः ।
कृतार्थीकृत्य चात्यानं स्वधाम समगात्ततः ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवेऽष्टादशोऽध्यायः ॥ १८ ॥